# श्री संकट नाशन गणेश स्तोत्रं

## नारद उवाच

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकं |
भक्तावासं स्मरेन्नित्यं आयु: काम्यार्थ सिध्धये ||
प्रथमं वक्रतुंडम च एकदंतं द्वितीयकं |
तृतीयं dकृष्णपिंगाक्षं गजवक्त्रं चतुर्धकं ||
लम्बोदरं पंचमं च षष्टम विकटमेव च |
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टकं ||
नवमं फालचंद्रं च दशमंतु विनायकं |
एकादशं गणपतिं द्वादशं तु गजाननं ||
द्वादशैतानि नामानि त्रि संध्यम य: पठेन्नर: |
न च विघ्न भयं तस्य सर्व सिध्धि करं प्रभो ||
विद्यार्थी लभते विद्यां धनार्थी लभते धनं |
पुत्रार्थी लभते पुत्रान मोक्षार्थी लभते गतिं |
जपेत गणपति स्तोत्रं षड्भिर मासै: फलं लभेत |
संवत्सरेण सिध्धिम च लभते नात्र संशय: ||
अष्टेभ्यो ब्राहमनेभ्यश्च लिखित्वा य: समर्पयेत |
तस्य विद्यात भवेत् सर्वा गणेशस्य प्रसादत: ||

**|| इति श्री नारद पुराणे संकट नाशन गणेश स्तोत्रं सम्पूर्ण ||**





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133